(UGC Care Listed)
ISSN 0507-1410

# VISHVESHVARANAND INDOLOGICAL JOURNAL

(An International Peer-Reviewed Refereed Research Journal)

Vols : LX-LXI

June-Dec.,
2021-22 & 2022-23

**Chief Editor**
CHAIRPERSON
VVBIS & IS (PU)
Hoshiarpur

**Editor**
PROF. RITU BALA
VVBIS & IS (PU)
Hoshiarpur

VISHVESHVARANAND VISHVA BANDHU INSTITUTE
OF SANSKRIT AND INDOLOGICAL STUDIES
PANJAB UNIVERSITY, HOSHIARPUR-146 021

YEAR - 2024

OLIVARES, LICERO JAZMIN LOPEZ

Postdoctoral Researcher, National Autonomous University of Mexico
Regional Center for Multidisciplinary Research
Email: l.lopez@crim.unam.mx
[Paper pp. 85-90]

PANDA, (Miss) PRAJNA

Research Scholar of Yoga (KKSU), Kaivalya Dham Research Institute &
Research Centre, Lonavala, Pune, Maharashtra.
[Paper pp. 97-110]

RAO (PROF.) C. UPENDER

Professor of Sanskrit & Pali, School of Sanskrit &
Indic Studies Jawaharlal Nehru University, New Delhi - 110061
[Paper pp. 111-119]

SATAPATHY, (DR) BANDITA

Principal, Gordhandas Seksaria College of Yoga and
Cultural Synthesis, Lonavala, Maharashtra.
[Paper pp. 97-110]

SHARMA, OMANDEEP

Asstt. Professor, Deptt. of Sanskrit & Pali, Punjabi University, Patiala-147002
[Paper pp. 74-78]

SHARMA (PROF.) PREM KUMAR

Act. Registrar, Former Dean & Head Dept. of Jyotish Shri Lal Bahadur Shastri National Sanskrit University, New Delhi-110016
[Paper pp. 1-8]

SINDHU (PROF.) SANJAY

Dean, Faculty of Law, Himachal Pradesh University,
Summerhill, Shimla 171005
[Paper pp. 60-73]

SINGH (DR.) VIKAS

Assistant Professor & Head, Department of Sanskrit, Marwari College
Lalit Narayan Mithila University, Darbhanga, Bihar, India
Email - vikas.sing.gautam@gmail.com
[Paper pp. 30-38]

वा ग्रहणं दृश्यते तन्नाम ज्योतिपशास्त्रे दृग्गणितैक्यं प्रत्यक्षत्वं वा कथ्यते। अतः स्व-स्व ग्रन्थरचनाकाले ग्रहस्फुटीकरणार्थं दृग्गणितैक्यतायाः प्रयासः कृतः।[5] सूर्यसिद्धान्तातिरिक्तभिन्न-भिन्नकाले सिद्धान्तज्ञैः आर्यभट्ट-लल्ल-ब्रह्मगुप्त-भास्कराचार्य-मुनीश्वर-कमलाकरभट्ट-चन्द्रशेखरसिंह सामन्त-वेंकटेशकेतकर प्रभृतिभिः दृग्गणितैक्यार्थं प्रयासः कृतः। कैश्चित् स्व-स्वरचनासु विशिष्टाः सिद्धान्ता अपि स्थापिताः। आर्यभट्टेन सर्वप्रथमं दशगुणोत्तारसंख्याप्रयोगः कृत।[6] अतः सः शून्यस्य दाशमिकपद्धत्याश्च जनकः कथ्यते। तेन तस्मिन् काले सूक्ष्मपरिधिव्यासम्बन्धः प्रतिपादतिः।[7] तेन 'यत् पिण्डे तद् ब्रह्माण्डे' इति वैदिकदर्शनसिद्धान्तेन कथितं यत् 'प्राणेनैति कलां भूः'[8] पृथिव्येकेन प्राणेन दशविपलतुल्यकालेन चतुः सेकेन्ण्डतुल्यसमयेन एककलपरिमितं क्षेत्रं गच्छति अनेनाक्षभ्रमणसिद्धान्तेन तेन सर्वप्रथमं भूभ्रमणसिद्धान्तः प्रतिपादितः।[9] अनेन द्वयोर्देशयोः पूर्वापररेखांशरेखान्तर-ज्ञानस्यपि पुष्टिर्भवति। तेन तस्मिन् काले त्रैकोणमितिकरीत्या ग्रहस्पष्टीकरणस्य सूर्यचन्द्रयोर्ग्रहणगतिस्य च सिद्धान्ता अपि प्रतिपादिताः। भास्कराचार्येण ख्रीष्टाब्दीयद्वादशशताब्द्यां सर्वप्रथममाकर्पणशक्तेः सिद्धान्तः प्रतिपादितः।[10] उदयान्तरसंस्कारस्यापि सिद्धान्तः सर्वप्रथमं तेन विवेचितः।[11] अथ च तेन ग्रहणतिस्य सर्वे सिद्धान्ताः स्पष्टरूपेण प्रतिपादिताः। कालविज्ञानस्य च सम्पूर्णसिद्धान्ताः स्पष्टीकृताः। चन्द्रशेखरसिंहसामन्तेन सिद्धान्तदर्पणे दृगणितदृष्ट्या चन्द्रगतिसंशोधनं कृतम्। वेंकटेशकेतकरेम च केतकीग्रहगमिते प्राचीनार्वाचीनदृष्ट्या दृग्मितैक्यसम्पादनार्थं ग्रहस्पष्टीकरणस्य सिद्धान्ताः प्रतिपादिताः अनेन प्रकारेण सूर्यसिद्धान्ततः वेंकटेशकेतकरकृतकेतकीग्रहगणितं यावद् विभिन्नाचार्यैर्ये विशिष्टाः सिद्धान्ताः प्रतिपादितास्तेषां विवेचनमत्रकृतम्। सिद्धान्तस्कन्धस्यापि त्रयो भेदाः सन्ति-सिद्धान्तः, तन्त्रं करणञ्चेति सिद्धान्तग्रन्थेपु कल्पादितः कल्पान्तं यावत् तन्त्रग्रन्थेषु च युगादितो ग्रहणणितं विधीयते। तन्त्रग्रन्थेपु आर्यभटीयं तन्त्रं सुप्रसिद्धमस्ति। करणग्रन्थेष्वभीष्टशकाब्दतो ग्रहगणितसाधनं विशेषग्रहगणित-सर्वानन्दकरणदयो ग्रन्थाः सुप्रसिद्धाः सन्ति। यद्यपि भास्करचार्यकृतसिद्धान्तलक्षणेन सिद्धान्तग्रन्थेषु त्रुट्यादितः प्रलयान्तपर्यन्तं कालगणना, नवविधकालानां विवेचनम्, ग्रहचारस्य सिद्धान्ताः, व्यक्ताव्यक्तगणितयोर्विवेचनम् दिग्देशकालानां ज्ञानम् प्रश्नानां सोपपत्तिकमुतरम्, भूगोल-खगोल-नक्षत्र-ग्रहस्थित्यादीनां विवेचनम् वेधयन्त्रादयः विषया विवेचिता भवन्ति[12] किन्तवत्र सिद्धान्तस्कन्धान्तर्गतकालविज्ञानस्य विशेषेण विवेचनं विधीयते।

यथा दिवसानन्तरं रात्रिर्भवति तथैव सृष्ट्यनन्तरं प्रलयः प्रलयानन्तरञ्च पुनः सृष्टिर्भवति। ऋग्वेदेऽघमर्षण-सूक्तेः प्रलयानन्तरं यथापूर्वं सृष्टेः कल्पना कृता।[13] भास्कराचार्येण सांख्यशास्त्रमतमनुसृत्य विश्वस्यादितत्त्व परब्रह्मणे प्रणिपातपूर्वकं पञ्चतन्मात्कसहितपञ्चमहाभूतैकादशेन्द्रियतद्देवसमुदायसमुदितं ब्रह्माण्डं, ब्रह्माण्डमध्ये च भूमेः संस्थानं कथितम्।[14] अथ च जगतोत्पादकेन ब्रह्मणा सृष्ट्यादौ भगणादिग्रहैः सह भचक्रं सृष्ट्वा निरन्तरभ्रमणे नियुक्तम् तदन्तारे चोत्तरदक्षिणध्रुवत्वेन कल्पिते। भचक्रे शीघ्रतरवेगेनपश्चिमाभिमुखे भ्रममाणेऽपि ग्रहः स्व-स्वगत्या नीचोच्चकक्षासु पूर्वाभिमुखं गच्छन्ति[15] आर्यभटेन भूमेः स्वाक्षभ्रमणेन भचक्रस्य पश्चिमाभिमुखभ्रमणं स्वीकृतम् अनेनैव भचक्रस्य पश्चिमाभिमुखभ्रमेणन ग्रहणाञ्च भचक्रे पूर्वाभिमुखभ्रमणेन कालस्य ग्रहणाञ्च भचक्रे पूर्वाभिमुखभ्रमणेन कालस्य विभिन्नानि मानान्युत्पद्यन्ते।

वैदिकदर्शने कालो नित्योऽनन्तोऽखण्डोऽमूर्तश्च कथितः। सूर्यसिद्धान्ते काले द्विधा कथितः। एकः

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५८
ISSN - 2231-0452

# उत्कर्षदीपिका
# Utkarṣadīpikā

(महस्विनी-विशेषाङ्कः)

प्रधानसम्पादकः
आचार्यः गुळ्ळपल्लि श्रीरामकृष्णमूर्त्तिः



सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के.एस्.
डॉ.उदयनहेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७
२०२३

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५८
ISSN : 2231-0452

# उत्कर्षदीपिका

(उत्कर्षमहोत्सवमुपलक्ष्य प्रकाश्यमानः महस्विन्याः विशेषाङ्कः)

प्रधानसम्पादकः
आचार्यः जि.एस.आर्. कृष्णमूर्तिः
कुलपतिः

सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के. एस्.
डा. उदयन हेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७५०७
२०२३

# उत्कर्षदीपिका

(महस्विनीविशेषाङ्कः – २०२३)

## शोधलेखानुक्रमः


| प्र. | विषयः | पुटाङ्कः |
|---|---|---|
| | भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि<br>– प्रो.रामसलाहीद्विवेदी | 1 |
| | कालिदासीयाः केचनापत्यप्रत्ययान्ताः<br>– प्रो.जयकान्तसिंहशर्मा | 5 |
| | सांख्यदर्शने मोक्षस्यावधारणा<br>– प्रो.सुजातात्रिपाठी | 15 |
| | ईश्वरस्वरूपमीमांसा<br>– प्रो.मारकण्डेयनाथतिवारी | 21 |
| | विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्<br>– डॉ. दयाल सिंह पंवार | 34 |
| | न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः<br>– प्रो. बिष्णुपदमहापात्रः | 38 |
| | शिक्षाशास्त्रे नवीनाः विचाराः<br>– आचार्य. के. भरतभूषणः | 46 |
| | वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे<br>– प्रो.प्रभाकरप्रसादः | 52 |
| | वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः<br>– प्रो. प्रेम कुमार शर्मा | 58 |
| | भारतीयजैनज्ञानपरंपरा<br>– प्रो.अनेकांतकुमारजैनः | 67 |

# वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः

प्रो. प्रेम कुमार शर्मा*

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्।।

ऋग्वेदस्य प्रथममन्त्रेणैव स्पष्टमिदं यद् वेदानां प्रवृत्तिः यज्ञकर्मप्रवृत्यर्थं जाता। यज्ञाश्च कालसापेक्षाः प्रवर्तन्ते। अत एव यज्ञानां यथाकालं सम्पादनार्थं कालविधानशास्त्रस्य वेदाङ्गभूतस्य वैदिकज्योतिषशास्त्रस्य विकासः सञ्जातः। वेदाङ्गज्योतिषमस्यैव पुष्टिं विदधाति –

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥

वैदिक वाङ्मये 'अग्निसोमात्मकं जगत्' इत्युद्भावनया ब्रह्मणा सूर्यचन्द्रमसोः कल्पनानन्तरं द्यूलोकभूर्लोकान्तरिक्षलोकादिसप्तभुवनानां सृष्टिं विधाय रात्र्यनन्तरमुषसस्तदुपरान्तञ्च कालस्य विभिन्नावयवानां दिनतिथिमासनक्षत्रर्त्वयनवर्षयुगादीनां राशिग्रहग्रहकक्षादीनां कल्पना यथा कृता तदत्रशोधपत्रे वैज्ञानिकदृशा विविच्यते।

ऋग्वेदस्याघमर्षणसूक्ते सृष्ट्युत्पत्तेः क्रम इत्थं प्रतिपादितः –

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः॥ 1॥
समुद्रादर्णवादधिसंवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ 2॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः॥ 3॥

पुरुषसूक्ते विराटस्वरूपपुरुषस्य नाभिप्रदेशेऽन्तरिक्षस्य, ऊर्ध्वभागे द्युलोकस्य अधोभागे च भूर्लोकस्य कल्पना कृता –

* आचार्यः, ज्योतिषविभागः, श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली